॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

षष्ठकाण्डे पञ्चमः प्रश्नः

सोममन्त्रब्राह्मणनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

इन्द्रो वृत्राय वज्रमुदयच्छथ् स वृत्रो वज्रादुद्यतादबिभेथ् सोऽब्रवीन्मा मे प्र हारस्ति वा इदम्मयि वीर्यन्तत् ते प्र दास्यामीति तस्मा उक्थ्यम्प्रायच्छत् तस्मै द्वितीयमुदयच्छथ् सोऽब्रवीन्मा मे प्र हारस्ति वा इदम्मयि वीर्यन्तत् ते प्र दास्यामीति ॥ [१] ॥ तस्मा उक्थ्यमेव प्रायच्छत् तस्मै तृतीयमुदयच्छत् तँविष्णुरन्वतिष्ठत जहीति सोऽब्रवीन्मा मे प्र हारस्ति वा इदम्मयि वीर्यन्तत् ते प्र दास्यामीति तस्मा उक्थ्यमेव प्रायच्छत् तन्निर्मायम्भूतमहन् यज्ञो हि तस्य मायाऽऽसीद्यदुक्थ्यो गृह्यत इन्द्रियमेव ॥ [२] ॥ तद् वीर्यँय्यजमानो भ्रातृव्यस्य वृङ्क्त इन्द्राय त्वा बृहद्वते वयस्वत इत्याहेन्द्राय हि स तम्प्रायच्छत् तस्मै त्वा विष्णवे त्वेत्याह यदेव विष्णुरन्वतिष्ठत जहीति तस्माद्विष्णुमन्वाभजति त्रिर् निर् गृह्णाति त्रिर्हि स तन्तस्मै प्रायच्छदेष ते योनिः पुनर्हविरसीत्याह पुनःपुनर् ॥ [३] ॥ ह्यस्मान्निर् गृह्णाति चक्षुर् वा एतद्यज्ञस्य यदुक्थ्यस्तस्मादुक्थ्यꣳ हुतꣳ सोमा अन्वायन्ति तस्मादात्मा चक्षुरन्वेति तस्मादेकँय्यन्तम्बहवोऽनु यन्ति तस्मादेको बहूनाम्भद्रो भवति तस्मादेको बह्वीर् जाया विन्दते यदि कामयेताद्ध्वर्युरात्मानँय्यज्ञयशसेनार्पयेय मित्यन्तराऽऽहवनीयञ्च हविर्द्धानञ्च तिष्ठन्नव नये ॥ [४] ॥ दात्मानमेव यज्ञयशसेनार्पयति यदि कामयेत यजमानँय्यज्ञयशसेनार्पयेयमित्यन्तरा सदोहविर्द्धाने तिष्ठन्नव नयेद्यजमानमेव यज्ञयशसेनार्पयति यदि कामयेत सदस्यान् यज्ञयशसेनार्पयेयमिति सद आलभ्याव नयेथ् सदस्यानेव यज्ञयशसेनार्पयति ॥ [५] ॥

(इतीं न्द्रियमेव पुनःपुनर् नयेत् त्रयस्त्रिꣳशच्च) ॥ १ ॥

आयुर् वा एतद्यज्ञस्य यद् ध्रुव उत्तमो ग्रहाणाङ्गृह्यते तस्मादायुः प्राणानामुत्तमम्मूर्द्धानन्दिवो अरतिम्पृथिव्या इत्याह मूर्द्धानमेवैनꣳ समानानाङ्करोति वैश्वानरमृताय जातमग्निमित्याह वैश्वा-नरꣳ हि देवतयाऽऽयुरुभयतोवैश्वानरो गृह्यते तस्मादुभयतः प्राणा अधस्ताच्चोपरिष्टा च्चार्द्धि-नोऽन्ये ग्रहा गृह्यन्तेऽर्द्धी ध्रुवस्तस्मा ॥ [६] ॥ दर्द्ध्यवाङ्क् प्राणोऽन्येषाम्प्राणानामुपोप्तेऽन्ये ग्रहाः साद्यन्तेऽनुपोप्ते ध्रुव स्तस्मादस्थ्नाऽन्याः प्रजाः प्रतितिष्ठन्ति माꣳसेनान्या असुरा वा उत्तरतः पृथिवीम्पर्याचिकीर्षन् तान्देवा ध्रुवेणादृꣳहन् तद् ध्रुवस्य ध्रुवत्वय्यँद् ध्रुव उत्तरतः साद्यते धृत्या आयुर्वा एतद्यज्ञस्य यद् ध्रुव आत्मा होता यद्धोतृचमसे ध्रुवमवनयत्यात्मन्नेव यज्ञस्या ॥ [७] ॥ युर् दधाति पुरस्तादुक्थस्यावनीय इत्याहुः पुरस्ताद्ध्यायुषो भुङ्क्ते मद्ध्य-तोऽवनीय इत्याहुर्मद्ध्यमेन ह्यायुषो भुङ्क्त उत्तरार्द्धेऽवनीय इत्याहुरुत्तमेन ह्यायुषो भुङ्क्ते वैश्वदे-व्यामृचि शस्यमानायामव नयति वैश्वदेव्यो वै प्रजाः प्रजास्वेवाऽऽयुर् दधाति ॥ [८] ॥

(ध्रुवस्तस्मादेव यज्ञस्यैकान्नचत्वारिꣳशच्च) ॥ २ ॥

यज्ञेन वै देवाः सुवर्गँल्लोकमायन् तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति ते सँव्वथ्स-रेण योपयित्वा सुवर्गँल्लोकमायन् तमृषय ऋतुग्रहैरेवानु प्राजानन्यदृतुग्रहा गृह्यन्ते सुवर्गस्य लोकस्य प्रज्ञात्यै द्वादश गृह्यन्ते द्वादश मासाः सँव्वथ्सरः सँव्वथ्सरस्य प्रज्ञात्यै सह प्रथमौ गृह्येते सहोत्तमौ तस्माद् द्वौद्वावृतू उभयतोमुखमृतुपात्रम्भवति को ॥ [९] ॥ हि तद्वेद यत ऋतूनाम्मुखमृतुना प्रेष्येति षट् कृत्व आह षड्वा ऋतव ऋतूनेव प्रीणात्यृतुभिरिति चतुश्चतुष्पद एव पशून् प्रीणाति द्विः पुनर्ऋतुनाऽऽह द्विपद एव प्रीणात्यृतुना प्रेष्येति षट् कृत्व आहर्तुभि-रिति चतुस्तस्माच्चतुष्पादः पशव ऋतूनुप जीवन्ति द्विः ॥ [१०] ॥ पुनर्ऋतुनाऽऽह तस्मा-द्द्विपादश्चतुष्पदः पशूनुप जीवन्त्यृतुना प्रेष्येति षट् कृत्व आहर्तुभिरिति चतुर् द्विः पुनर्ऋतु-नाऽऽहाऽऽक्रमणमेव तथ् सेतुय्यँजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै नान्योऽन्यमनु प्र

पद्येत यदन्यौँऽन्यमनुप्रपद्येतर्तुर्ऋतुमनु प्र पद्येतर्तवो मोहुकाः स्युः ॥ [११] ॥ प्रसिद्धमेवाद्ध्वर्युर् दक्षिणेन प्रपद्यते प्रसिद्धम्प्रतिप्रस्थातोत्तरेण तस्मादादित्यः षण्मासो दक्षिणेनैति षडुत्तरेणोपयामगृहीतोऽसि सꣳसर्पौऽस्यꣳहस्पत्याय त्वेत्याहास्ति त्रयोदशो मास इत्याहुस्तमेव तत् प्रीणाति ॥ [१२] ॥

(को जीवन्ति द्विः स्यु श्चतुस्त्रिꣳशच्च) ॥ ३ ॥

सुवर्गाय वा एते लोकाय गृह्यन्ते यदृतुग्रहा ज्योतिरिन्द्राग्नी यदैन्द्राग्नमृतुपात्रेण गृह्णाति ज्योतिरेवास्मा उपरिष्टाद्दधाति सुवर्गस्य लोकस्यानुख्यात्या ओजोभृतौ वा एतौ देवानाँय्यदिन्द्राग्नी यदैन्द्राग्नो गृह्यत ओज एवाव रुन्धे वैश्वदेवꣳ शुक्रपात्रेण गृह्णाति वैश्वदेव्यो वै प्रजा असावादित्यः शुक्रो यद्वैश्वदेवꣳ शुक्रपात्रेण गृह्णाति तस्मादसावादित्यः ॥ [१३] ॥ सर्वाः प्रजाः प्रत्यङ्ङुदेति तस्माथ् सर्व एव मन्यते माम्प्रत्युदगादिति वैश्वदेवꣳ शुक्रपात्रेण गृह्णाति वैश्वदेव्यो वै प्रजास्तेजः शुक्रो यद्वैश्वदेवꣳ शुक्रपात्रेण गृह्णाति प्रजास्वेव तेजो दधाति ॥ [१४] ॥

(तस्मादसावादित्य स्त्रिꣳशच्च) ॥ ४ ॥

इन्द्रो मरुद्भिः साविद्येन माद्ध्यन्दिने सवने वृत्रमहन्यन्माद्ध्यन्दिने सवने मरुत्वतीया गृह्यन्ते वार्त्रघ्ना एव ते यजमानस्य गृह्यन्ते तस्य वृत्रञ्जघ्नुष ऋतवोऽमुह्यन्थ् स ऋतुपात्रेण मरुत्वतीयानगृह्णात् ततो वै स ऋतून् प्राजानाद्यदृतुपात्रेण मरुत्वतीया गृह्यन्त ऋतूनाम्प्रज्ञात्यै वज्रँवा एतँय्यजमानो भ्रातृव्याय प्र हरति यन्मरुत्वतीया उदेव प्रथमेन ॥ [१५] ॥ यच्छति प्र हरति द्वितीयेन स्तृणुते तृतीयेनाऽऽयुधँवा एतद्यजमानः सꣳ स्कुरुते यन्मरुत्वतीया धनुरेव प्रथमो ज्या द्वितीय इषुस्तृतीयः प्रत्येव प्रथमेन धत्ते वि सृजति द्वितीयेन विद्ध्यति तृतीयेनेन्द्रो वृत्रꣳ हत्वा पराम्परावतमगच्छदपाराधमिति मन्यमानः स हरितोऽभवथ् स एतान् मरुत्वतीयानात्मस्परणानपश्यत् तानगृह्णीत ॥ [१६] ॥ प्राणमेव प्रथमेनास्पृणुतापानन्द्वितीयेनाऽऽत्मानन्तृतीयेनाऽऽत्मस्परणा वा एते यजमानस्य गृह्यन्ते यन्मरुत्वतीयाः प्राणमेव प्रथमेन स्पृणु-

तेऽपानन्द्वितीयेनाऽऽत्मानं तृतीयेनेन्द्रो वृत्रमहन् तन्देवा अब्रुवन् महान्वा अयमभूद्यो वृत्रम-वधीदिति तन्महेन्द्रस्य महेन्द्रत्वꣳ स एतम्माहेन्द्रमुद्धारमुदहरत वृत्रꣳ हत्वाऽन्यासु देवतास्व धि यन्माहेन्द्रो गृह्यत उद्धारमेव तय्ँयजमान उद्धरतेऽन्यासु प्रजास्वधि शुक्रपात्रेण गृह्णाति यजमानदेवत्यो वै माहेन्द्रस्तेजः शुक्रो यन्माहेन्द्रꣳ शुक्रपात्रेण गृह्णाति यजमान एव तेजो दधाति ॥ [१७] ॥

(प्रथमेना गृह्णीत देवतास्व ष्षाविꣳशतिश्च) ॥ ५ ॥

अदितिः पुत्रकामा साद्ध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत् तस्या उच्छेषणमददु स्तत् प्राश्नाथ् सा रेतोऽधत्त तस्यै चत्वार आदित्या अजायन्त सा द्वितीयमपचथ् साऽमन्यतोच्छेषणान्म इमेऽज्ञत यदग्रे प्राशिष्यामीतो मे वसीयाꣳसो जनिष्यन्त इति साऽग्रे प्राश्नाथ् सा रेतोऽधत्त तस्यै व्यृद्धमाण्डमजायत साऽऽदित्येभ्य एव ॥ [१८] ॥ तृतीयमपचद्भोगाय म इदꣳ श्रान्त-मस्त्विति तेऽब्रुवन् वरव्ँवृणामहै योऽतो जायाता अस्माकꣳ स एकोऽसद्योऽस्य प्रजायामृद्ध्याता अस्माकम्भोगाय भवादिति ततो विवस्वानादित्योऽजायत तस्य वा इयम्प्रजा यन्मनुष्यास्ता-स्वेक एवर्द्धो यो यजते स देवानाम्भोगाय भवति देवा वै यज्ञाद् ॥ [१९] ॥ रुद्रमन्तरायन्थ् स आदित्यानन्वाक्रमत ते द्विदेवत्यान् प्रापद्यन्त तान् न प्रति प्रायच्छन् तस्मादपि वद्ध्यम्प्रपन्नन्न प्रति प्र यच्छन्ति तस्माद् द्विदेवत्येभ्य आदित्यो निर् गृह्यते यदुच्छेषणादजायन्त तस्मादुच्छे-षणाद्गृह्यते तिसृभिर्ऋग्भिर् गृह्णाति माता पिता पुत्रस्तदेव तन्मिथुनमुल्बङ्गर्भो जरायु तदेव तन् ॥ [२०] ॥ मिथुनम्पशवो वा एते यदादित्य ऊर्ग् दधि दध्ना मद्ध्यतः श्रीणात्यूर्जमेव पशूनाम्मद्ध्यतो दधाति शृतातङ्केन मेद्ध्यत्वाय तस्मादामा पक्वन्दुहे पशवो वा एते यदादित्यः परिश्रित्य गृह्णाति प्रतिरुद्ध्यैवास्मै पशून् गृह्णाति पशवो वा एते यदादित्य एष रुद्रो यदग्निः परिश्रित्य गृह्णाति रुद्रादेव पशूनन्तर् दधा ॥ [२१] ॥ त्येष वै विवस्वानादित्यो यदुपाꣳशु-सवनः स एतमेव सोमपीथम्परि शय आ तृतीयसवनाद्विवस्व आदित्यैष ते सोमपीथ इत्याह विवस्वन्तमेवाऽऽदित्यꣳ सोमपीथेन समर्द्धयति या दिव्या वृष्टिस्तया त्वा श्रीणामीति वृष्टिका-मस्य श्रीणीयाद्वृष्टिमेवाव रुन्धे यदि ताजक् प्रस्कन्देद् वर्षुकः पर्जन्यः स्याद्यदि चिरमवर्षुको

न सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट् करोति यदनुवषट्कुर्याद्रुद्रम्प्रजा अन्ववसृजेन्न हुत्वाऽन्वीक्षेत यदन्वीक्षेत चक्षुरस्य प्रमायुकꣳ स्यात् तस्मान्नान्वीक्ष्यः ॥ [२२] ॥

(एव यज्ञा जरायु तदेव तद् न्तर्दधाति न सप्तविꣳशतिश्च) ॥ ६ ॥

अन्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति प्रजापतिर् वा एष यदाग्रयणः प्रजानाम्प्रजननाय न सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट् करोति यदनुवषट्कुर्याद्रुद्रम्प्रजा अन्ववसृजेदेष वै गायत्रो देवानाय्ँयथ् सवितैष गायत्रियै लोके गृह्यते यदाग्रयणो यदन्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति स्वादेवैनय्ँयोनेर् निर् गृह्णाति विश्वे ॥ [२३] ॥ देवास्तृतीयꣳ सवनन्नोदयच्छन् ते सवितारम्प्रातस्सवनभागꣳ सन्तन्तृतीयसवनमभि पर्यणयन् ततो वै ते तृतीयꣳ सवनमुदयच्छन्यत् तृतीयसवने सावित्रो गृह्यते तृतीयस्य सवनस्योद्यत्यै सवितृपात्रेण वैश्वदेवङ्कलशाद्गृह्णाति वैश्वदेव्यो वै प्रजा वैश्वदेवः कलशः सविता प्रसवानामीशे यथ् सवितृपात्रेण वैश्वदेवङ्कलशाद्गृह्णाति सवितृप्रसूत एवास्मै प्रजाः प्र ॥ [२४] ॥ जनयति सोमे सोममभि गृह्णाति रेत एव तद्दधाति सुशर्माऽसि सुप्रतिष्ठान इत्याह सोमे हि सोममभिगृह्णाति प्रतिष्ठित्या एतस्मिन् वा अपि ग्रहे मनुष्येभ्यो देवेभ्यः पितृभ्यः क्रियते सुशर्माऽसि सुप्रतिष्ठान इत्याह मनुष्येभ्य एवैतेन करोति बृहदित्याह देवेभ्य एवैतेन करोति नम इत्याह पितृभ्य एवैतेन करोत्ये तावतीर् वै देवतास्ताभ्य एवैनꣳ सर्वाभ्यो गृह्णात्येष ते योनिर् विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येषः ॥ [२५] ॥

(विश्वे प्र पितृभ्य एवैतेन करोत्ये कान्नविꣳशतिश्च) ॥ ७ ॥

प्राणो वा एष यदुपाꣳशुर्यदुपाꣳशुपात्रेण प्रथमश्चोत्तमश्च ग्रहौ गृह्येते प्राणमेवानु प्रयन्ति प्राणमनूद्यन्ति प्रजापतिर् वा एष यदाग्रयणः प्राण उपाꣳशुः पत्नीः प्रजाः प्र जनयन्ति यदुपाꣳशुपात्रेण पात्नीवतमाग्रयणाद्गृह्णाति प्रजानाम्प्रजननाय तस्मात् प्राणं प्रजा अनु प्र जायन्ते देवा वा इतैतः पत्नीः सुवर्ग ॥ [२६] ॥ ल्लोकमजिगाꣳसन् ते सुवर्गल्ँलोकन्न प्राजानन् त एतम्पात्नीवतमपश्यन् तमगृह्णत ततो वै ते सुवर्गल्ँलोकम्प्राजानन्यत् पात्नीवतो गृह्यते सुवर्गस्य लोकस्य

प्रज्ञात्यै स सोमो नातिष्ठत स्त्रीभ्यो गृह्यमाणस्तङ्घृतँव्वज्रङ्कृत्वाऽघ्नन् तन्निरिन्द्रियम्भूतमगृह्णन् तस्माथ् स्त्रियो निरिन्द्रिया अदायादीरपि पापात् पुꣳस उपस्तितर ॥ [२७] ॥ व्वँदन्ति यद्घृतेन पात्नीवतङ्ग् श्रीणाति वज्रेणैवैनव्वँशे कृत्वा गृह्ण त्युपयामगृहीतोऽसीत्याहेयँव्वा उपयामस्तस्मा-दिमाम्प्रजा अनु प्र जायन्ते बृहस्पतिसुतस्य त इत्याह ब्रह्म वै देवानाम्बृहस्पतिर् ब्रह्मणैवास्मै प्रजाः प्र जनयतीन्दो इत्याह रेतो वा इन्दू रेत एव तद्दधातीन्द्रियाव इ ॥ [२८] ॥ त्याह प्रजा वा इन्द्रियम्प्रजा एवास्मै प्र जनयत्यग्ना(३) इत्याहाग्निर् वै रेतोधाः पत्नीव इत्याह मिथुनत्वाय सजूर् देवेन त्वष्ट्रा सोमम्पिबेत्याह त्वष्टा वै पशूनाम्मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधाति देवा वै त्वष्टार मजिघाꣳसन्थ् स पत्नीः प्रापद्यत तन्न प्रति प्रायच्छन् तस्मादपि ॥ [२९] ॥ वद्ध्यम्प्रपन्नन्न प्रति प्र यच्छन्ति तस्मात् पात्नीवते त्वष्ट्रेऽपि गृह्यते न सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट् करोति यदनुवषट्कुर्याद्रुद्रम्प्रजा अन्ववसृजेद्यन्नानुवषट्कुर्यादशान्तमग्नीथ् सोमम्भक्षयेदु-पाꣳश्वनु वषट् करोति न रुद्रम्प्रजा अन्ववसृजति शान्तमग्नीथ् सोमम्भक्षयत्यग्नीन्नेष्टुरुपस्थमा सीद ॥ [३०] ॥ नेष्टः पत्नीमुदानयेत्याहाग्नीदेव नेष्टरि रेतो दधाति नेष्टा पत्नियामुद्गात्रा सङ्ख्याप-यति प्रजापतिर् वा एष यदुद्गाता प्रजानाम्प्रजननायाप उप प्र वर्तयति रेत एव तथ् सिञ्चत्यूरुणोप प्र वर्तयत्यूरुणा हि रेतः सिच्यते नग्नङ्कृत्योरुमुप प्र वर्तयति यदा हि नग्न ऊरुर् भवत्यथ मिथुनी भवतोऽथ रेतः सिच्यतेऽथ प्रजाः प्र जायन्ते ॥ [३१] ॥

(पत्नीः सुवर्ग मुपस्तितर मिन्द्रियाव इत्यपिसीदमिथुन्यष्टौ च) ॥ ८ ॥

इन्द्रो वृत्रमहन् तस्य शीर्षकपालमुदौब्जथ् स द्रोणकलशोऽभवत् तस्माथ् सोमः सम-स्रवथ् स हारियोजनोऽभवत् तव्ँव्यचिकित्थसज्जुहवानी(३) मा हौषा(३)मिति सोऽमन्यत यद्धो-ष्याम्यामꣳ होष्यामि यन्न होष्यामि यज्ञवेशसङ्करिष्यामीति तमद्ध्रियत होतुꣳ सोऽग्निरब्रवीन्न मय्यामꣳ होष्यसीति तन्धानाभिरश्रीणात् ॥ [३२] ॥ तꣳ शृतम्भूतमजुहोद्यद्धानाभिर्हारि-योजनङ्ग् श्रीणाति शृतत्वाय शृतमेवैनम्भूतञ्जुहोति बह्वीभिः श्रीणात्येतावतीरेवास्यामुष्मिँल्लोके कामदुघा भवन्त्यथो खल्वाहुरेता वा इन्द्रस्य पृश्नयः कामदुघा यद्धारियोजनीरिति तस्मा-द्बह्वीभिः श्रीणीयादृक्सामे वा इन्द्रस्य हरी सोमपानौ तयोः परिधय आधानय्ँयदप्रहृत्य परि-

धीञ्जुहुयादन्तराधानाभ्यां ॥ [३३] ॥ घासम्प्र यच्छेत् प्रहृत्य परिधीञ्जुहोति निराधानाभ्या-मेव घासम्प्र यच्छत्युन्नेता जुहोति यातयामेव ह्येतर्ह्यध्वर्युः स्वगाकृतो यदध्वर्युर् जुहुया-द्यथा विमुक्तम्पुनर् युनक्ति तादृगेव तच्छीर्षन्नधिनिधाय जुहोति शीर्षतो हि स समभव-द्विक्रम्य जुहोति विक्रम्य हीन्द्रो वृत्रमहन्थ् समृद्ध्यै पशवो वै हारियोजनीर् यथ् संभिन्द्या-दल्पा ॥ [३४] ॥ एनम्पशवो भुञ्जन्त उपतिष्ठेरन्यन्न संभिन्द्याद्बहव एनम्पशवोऽभुञ्जन्त उप तिष्ठेरन् मनसा सम्बाधत उभयङ्करोति बहव एवैनम्पशवो भुञ्जन्त उप तिष्ठन्त उन्नेतर्युपहवमि-च्छन्ते य एव तत्र सोमपीथस्तमेवाव रुन्धत उत्तरवेद्यान्निवपति पशवो वा उत्तरवेदिः पशवो हारियोजनीः पशुष्वेव पशून् प्रति ष्ठापयन्ति ॥ [३५] ॥

(अश्रीणा दन्तराधानाभ्या मल्पाः स्थापयन्ति) ॥ ९ ॥

ग्रहान्वा अनु प्रजाः पशवः प्र जायन्त उपाꣳश्वन्तर्यामावजावयः शुक्रामन्थिनौ पुरुषा ऋतु-ग्रहानेकशफा आदित्यग्रहङ्गाव आदित्यग्रहो भूयिष्ठाभिरृग्भिर् गृह्यते तस्माद्गावः पशूनाम्भू-यिष्ठा यत् त्रिरुपाꣳशुꣳ हस्तेन विगृह्णाति तस्माद् द्वौ त्रीनजा जनयत्यथावयो भूयसीः पिता वा एष यदाग्रयणः पुत्रः कलशो यदाग्रयण उपदस्येत् कलशाद्गृह्णीयाद्यथा पिता ॥ [३६] ॥ पुत्रङ्क्षित उपधावति तादृगेव तद्यत् कलश उपदस्येदाग्रयणाद्गृह्णीयाद्यथा पुत्रः पितरङ्क्षित उपधावति तादृगेव तदात्मा वा एष यज्ञस्य यदाग्रयणो यद्ग्रहो वा कलशो वोपदस्येदाग्रयणाद्गृ-ह्णीयादात्मन एवाधि यज्ञन्निष्करोत्यविज्ञातो वा एष गृह्यते यदाग्रयणः स्थाल्या गृह्णाति वायव्येन जुहोति तस्माद् ॥ [३७] ॥ गर्भेणाविज्ञातेन ब्रह्महाऽवभृथमव यन्ति परा स्थालीरस्यन्त्युद्वा-यव्यानि हरन्ति तस्माथ् स्त्रियञ्जाताम्पराऽस्यन्त्युत् पुमाꣳसꣳ हरन्ति यत् पुरोरुचमाह यथा वस्यस आहरति तादृगेव तद्यद्ग्रहङ्गृह्णाति यथा वस्यस आहृत्य प्राऽऽह तादृगेव तद्यथ् सादयति यथा वस्यस उपनिधायापक्रामति तादृगेव तद् यद् वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलन्तद्य-दृचा तद् दृढम्पुरस्तादुपयामा यजुषा गृह्यन्त उपरिष्टा दुपयामा ऋचा यज्ञस्य धृत्यै ॥ [३८] ॥

(यथा पिता तस्मा दपक्रामति तादृगेव तद् य दृष्टादश च) ॥ १० ॥

प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्तेऽमुमेव तैर् लोकमभि जयति पराङिव ह्यसौ लोको यानि पुनः प्रयुज्यन्त इममेव तैर् लोकमभि जयति पुनःपुनरिव ह्ययँल्लोकः प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वोषधयः परा भवन्ति यानि पुनः ॥ [३९] ॥ प्रयुज्यन्ते तान्यन्वोषधयः पुनरा भवन्ति प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वारण्याः पशवोऽरण्यमप यन्ति यानि पुनः प्रयुज्यन्ते तान्यनु ग्राम्याः पशवो ग्राममुपावयन्ति यो वै ग्रहाणान्निदानव्ँवेद निदानवान् भवत्याज्यमित्युक्थन्तद्वै ग्रहाणान्निदानय्ँयदुपाꣳशु शꣳसति त ॥ [४०] ॥ दुपाꣳश्वन्तर्यामयोर् यदुच्चैस्तदितरेषाङ्ग्रहाणामेतद्वै ग्रहाणान्निदानय्ँय एवव्ँवेद निदानवान् भवति यो वै ग्रहाणाम्मिथुनव्ँवेद प्र प्रजया पशुभिर् मिथुनैर् जायते स्थालीभिरन्ये ग्रहा गृह्यन्ते वायव्यैरन्य एतद्वै ग्रहाणाम्मिथुनय्ँय एवव्ँवेद प्र प्रजया पशुभिर् मिथुनैर् जायत इन्द्रस्त्वष्टुः सोममभीषहाऽपिबथ् स विष्वङ् ॥ [४१] ॥ व्यार्च्छथ् स आत्मन्नारमणन्नाविन्दथ् स एताननुसवनम्पुरोडाशानपश्यत् तान् निरवपत् तैर्वै स आत्मन्नारमणमकुरुत तस्मादनुसवनम्पुरोडाशा निरुप्यन्ते तस्मादनुसवनम्पुरोडाशानां प्राश्ञीयादात्मन्नेवाऽऽरमणङ्कुरुते नैनꣳ सोमोऽति पवते ब्रह्मवादिनो वदन्ति नर्चा न यजुषा पङ्क्तिराप्यतेऽथ किय्ँयज्ञस्य पाङ्क्तत्वमिति धानाः करम्भः परिवापः पुरोडाशः पयस्या तेन पङ्क्तिराप्यते तद्यज्ञस्य पाङ्क्तत्वम् ॥ [४२] ॥

(भवन्ति यानि पुनः शꣳसति त द्विष्वङ् किं चतुर्दश च) ॥ ११ ॥

समाप्ति कोर्वैः

(इन्द्रो वृत्रायाऽऽयुर्वै यज्ञेन सुवर्गा येन्द्रो मरुद्भि रदिति रन्तर्यामपात्रेण प्राण उपाꣳशु पात्रे णेन्द्रो वृत्रमहन् तस्य ग्रहान् प्रान्या न्येकादश)
(इन्द्रो वृत्राय पुनर्‌ऋतुनाऽऽह मिथुनम्पशवो नेष्टः पत्नी मुपाꣳश्वन्तर्यामयो द्विचत्वारिꣳशत्)
(इन्द्रो वृत्राय पाङ्क्तत्वं)

॥ हरिः ॐ ॥

षष्ठकाण्डे पञ्चमः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
११	४२

ॐ